CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

संस्कृतभाषाबोधिनी

भागः ५

श्री सुरसरस्वतीसभा
मैसूरु–४
१९७३
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

विषयानुक्रमणिका

(पूर्वार्धम्)

		पुटसङ्ख्या
१.	यौवराज्यप्रस्तावः	1
२.	सावित्री	3
३.	हिमालयः	6
४.	चन्द्रापीडजननम्	9
५.	कर्णभारम्	17

(उत्तरार्धम्)

१.	शुकनासोपदेशः	27
२.	अलङ्काराः	31

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

॥ श्रीः ॥

संस्कृतभाषाबोधिनी

भागः ५

श्री सुरसरस्वतीसभा
मैसूरु–४
१९७३

Sri Vidya Bharathi
Book Centre,
Bharathi Street,
SRINGERI - 577 139.

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಮುನ್ನುಡಿ

ದೇಶಭಾಷೆಗಳಲ್ಲಿಲ್ಲ ಹಾಸುಹೊಕ್ಕಾಗಿ ವ್ಯಾಪಿಸಿರುವ, ಸರಳ ಸುಂದರವಾದ ಭಾಷೆ ಸಂಸ್ಕೃತ. ಇದರ ಪ್ರಸಾರವೇ ಈ ನಮ್ಮ ಸಭೆಯ ಉದ್ದೇಶ. ಇದಕ್ಕಾಗಿ ಸುಲಭ ರೀತಿಯಲ್ಲಿ ಪಠ್ಯ ಪುಸ್ತಕ ಗಳನ್ನು ರಚಿಸಲಾಗಿದೆ.

ಪ್ರಕೃತ, ಈ ಪುಸ್ತಕವು ನಮ್ಮ ಸಭೆಯ ಪ್ರವೇಶ ಪರೀಕ್ಷೆಯ ಪಠ್ಯಗ್ರಂಥವಾಗಿದೆ. ಇದರಲ್ಲಿರುವ ಪೂರ್ವಾರ್ಧವು ಪ್ರಥಮ ಪತ್ರಿಕೆಯ, ಅಂತೆಯೇ ಉತ್ತರಾರ್ಧವು ದ್ವಿತೀಯ ಪತ್ರಿಕೆಯ ವಿಷಯವಾಗಿದೆ.

ಇದರಲ್ಲಿರುವ ನ್ಯೂನಾತಿರೇಕವನ್ನು ಸಹೃದಯರು ತಿಳಿಸಿದಲ್ಲಿ ಮುಂದಿನ ಮುದ್ರಣದಲ್ಲಿ ಸರಿಪಡಿಸಲು ಉಪಕಾರವಾಗುವುದು. ಅಂದವಾಗಿ ಬಹುಬೇಗ ಮುದ್ರಿಸಿ ಬೆಂಗಳೂರು ಪ್ರೆಸ್‌ನವರು ಉಪಕರಿಸಿದ್ದಾರೆ. ಇದನ್ನು ಸ್ಮರಿಸುವುದು ನಮ್ಮ ಕರ್ತವ್ಯ.

ತುರುವೇಕೆರೆ ವಿಶ್ವೇಶ್ವರ ದೀಕ್ಷಿತರು
ಶ್ರೀ ಸುರಸರಸ್ವತೀ ಸಭಾ, ಮೈಸೂರು-೪

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

पद्यभागः

यौवराज्यप्रस्तावः

ततः परिषदं सर्वामामन्त्र्य वसुधाधिपः ।
हितमुद्धर्षणं चैवमुवाच प्रथितं वचः ॥ १ ॥

विदितं भवतामेतत् यथा मे राज्यमुत्तमम् ।
पूर्वकैर्मम राजेन्द्रैः सुतवत्परिपालितम् ॥ २ ॥

सोऽहमिक्ष्वाकुभिः सर्वैर्नरेन्द्रैः प्रतिपालितम् ।
श्रेयसा योक्तुमिच्छामि सुखार्हमखिलं जगत् ॥ ३ ॥

मयाप्याचरितं पूर्वैः पन्थानमनुगच्छता ।
प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः ॥ ४ ॥

इदं शरीरं कृत्स्नस्य लोकस्य चरता हितम् ।
पाण्डुरस्यातपत्रस्य छायायां जरितं मया ॥ ५ ॥

राजप्रभावजुष्टां च दुर्वहामजितेन्द्रियैः ।
परिश्रान्तोऽस्मि लोकस्य गुर्वीं धर्मधुरं वहन् ॥ ६ ॥

सोऽहं विश्राममिच्छामि पुत्रं कृत्वा प्रजाहिते ।
सन्निकृष्टानिमान् सर्वाननुमान्य द्विजर्षभान् ॥ ७ ॥

अनुजातो हि मां सर्वैर्गुणैः श्रेष्ठो ममात्मजः ।
पुरन्दरसमो वीर्ये रामः परपुरञ्जयः ॥ ८ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तं चन्द्रमिव पुष्येण युक्तं धर्मभृतां वरम् ।
यौवराज्ये नियोक्तास्मि प्रातः पुरुषपुङ्गवम् ॥ ९ ॥

अनुरूपः स वो नाथो लक्ष्मीवान् लक्ष्मणाग्रजः ।
त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरम् ॥ १० ॥

अनेन श्रेयसा सद्यः संयोक्ष्येऽहमिमां महीम् ।
गतक्लेशो भविष्यामि सुते तस्मिन्निवेश्य वै ॥ ११ ॥

यदिदं मेऽनुरूप्यार्थं मया साधु सुमन्त्रितम् ।
भवन्तो मेऽनुमन्यन्तां कथं वा करवाण्यहम् ॥ १२ ॥

यद्यप्येषा मम प्रीतिर्हितमन्यत् विचिन्त्यताम् ।
अन्या मध्यस्थचिन्ता तु विमर्दाभ्यधिकोदया ॥ १३ ॥

इदं ब्रुवन्तं मुदिताः प्रत्यनन्दन् नृपा नृपम् ।
वृष्टिमन्तं महामेघं नर्दन्त इव बर्हिणः ॥ १४ ॥

स्निग्धोऽनुनादः सञ्जज्ञे ततो हर्षसमीरितः ।
जनौघोद्धुष्टसन्नादो मेदिनीं कम्पयन्निव ॥ १५ ॥

———

CC-O. In Public Domain. Digitized by eGangotri

सावित्री

अथ मद्राधिपो राजा नारदेन समागतः ।
उपविष्टः सभामध्ये कथायोगेन भारत ॥१॥

ततोऽभिगम्य तीर्थानि सर्वाण्येवाश्रमांस्तथा ।
आजगाम पितुर्वेश्म सावित्री सह मन्त्रिभिः ॥२॥

नारदेन सहासीनं सा दृष्ट्वा पितरं शुभा ।
उभयोरेव शिरसा चक्रे पादाभिवादनम् ॥३॥

नारदः—क्व गताभूत्सुतेयं ते कुतश्चैवागता नृप ।
किमर्थं युवतीं भर्त्रे न चैनां सम्प्रयच्छसि ॥४॥

राजा—कार्येण खल्वनेनैव प्रेषिताद्यैव चागता ।
एतस्याः शृणु देवर्षे भर्तारं योऽनया वृतः ॥५॥

सा ब्रूहि विस्तरेणेति पित्रा संनोदिता शुभा ।
तदैव तस्य वचनं प्रतिगृह्योदमब्रवीत् ॥६॥

आसीच्छाल्वेषु धर्मात्मा क्षत्रियः पृथिवीपतिः ।
द्युमत्सेन इति ख्यातः पश्चच्चान्धो बभूव ह ॥७॥

विनष्टचक्षुषस्तस्य बालपुत्रस्य धीमतः ।
सामीप्येन हृतं राज्यं छिद्रेऽस्मिन् पूर्ववैरिणा ॥८॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

स बालवत्सया सार्धं भार्यया प्रस्थितो वनम् ।
महारण्यं गतश्चापि तपस्तेपे महाव्रतः ॥९॥

तस्य पुत्रः पुरे जातः संवृद्धश्च तपोवने ।
सत्यवाननुरूपो मे भर्तेति मनसा वृतः ॥१०॥

ना.— अहो बत महत्पापं सावित्र्या नृपते कृतम् ।
अजानन्त्या यदनया गुणवान् सत्यवान् वृतः ॥११॥

रा.— अपीदानीं स तेजस्वी बुद्धिमान् वा नृपात्मजः ।
क्षमावानपि वा शूरः सत्यवान् पितृवत्सलः ॥१२॥

ना.— विवस्वानिव तेजस्वी बृहस्पतिसमो मतौ ।
महेन्द्र इव वीरश्च वसुधेव क्षमान्वितः । ॥१३॥

रा.— अपि राजात्मजो दाता ब्रह्मण्यश्चापि सत्यवान् ।
रूपवानप्युदारो वाप्यथवा प्रियदर्शनः ॥१४॥

ना.— साङ्कृते रन्तिदेवस्य स्वशक्त्या दानतः समः ।
ब्रह्मण्यः सत्यवादी च शिबिरौशीनरो यथा ॥१५॥

ययातिरिव चोदारः सोमवत् प्रियदर्शनः ।
रूपेणान्यतमोऽश्विभ्यां द्युमत्सेनसुतो बली ॥१६॥

स दान्तः स मृदुः शूरः स सत्यः संयतेन्द्रियः ।
स मैत्रः सोऽनसूयश्च स ह्रीमान् द्युतिमांश्च सः ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

नित्यशश्चार्जवं तस्मिन् स्थितिस्तस्यैव च ध्रुवा ।
सङ्क्षेपतस्तपोवृद्धैः शीलवृद्धैश्च कथ्यते ॥१८॥

रा.— गुणैरुपेतं सर्वैस्तं भगवन् प्रब्रवीषि मे ।
दोषानप्यस्य मे ब्रूहि यदि सन्तीह केचन ॥१९॥

ना.— एक एवास्य दोषो हि गुणानाक्रम्य तिष्ठति ।
स च दोषः प्रयत्नेन न शक्यमतिवर्तितुम् ॥२०॥

एको दोषोऽस्ति नान्योऽस्य सोऽद्य प्रभृति सत्यवान् ।
संवत्सरेण क्षीणायुर्देहन्यासं करिष्यति ॥२१॥

रा.— एहि सावित्रि गच्छ त्वमन्यं वरय शोभने ।
तस्य दोषो महानेको गुणानाक्रम्य च स्थितः ॥२२॥

यथा मे भगवानाह नारदो देवसत्कृतः ।
संवत्सरेण सोऽल्पायुर्देहन्यासं करिष्यति ॥२३॥

सावित्री—सकृदंशो निपतति सकृत्कन्या प्रदीयते ।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥२४॥

दीर्घायुरथवाल्पायुः सगुणो निर्गुणोऽपि वा ।
सकृद् वृतो मया भर्ता न द्वितीयं वृणोम्यहम् ॥२५॥

मनसा निश्चयं कृत्वा ततो वाचाभिधीयते ।
क्रियते कर्मणा पश्चात् प्रमाणं मे मनस्ततः ॥२६॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ना.— स्थिरा बुद्धिर्नरश्रेष्ठ सावित्र्या दुहितुस्तव ।
नैषा वारयितुं शक्या धर्मादस्मात् कथञ्चन ॥२७॥

नान्यस्मिन् पुरुषे सन्ति ये सत्यवति वै गुणाः ।
प्रदानमेव तस्मान्मे रोचते दुहितुस्तव ॥२८॥

रा.— अविचाल्यमेतदुक्तं तथ्यं च भवता वचः ।
करिष्याम्येतदेवं च गुरुर्हि भगवान् मम ॥२९॥

ना.— अविघ्नमस्तु सावित्र्याः प्रदाने दुहितुस्तव ।
साधयिष्याम्यहं तावत् सर्वेषां भद्रमस्तु वः ॥३०॥

हिमालयः

अस्त्युत्तरस्यां दिशि देवतात्मा
हिमालयो नाम नगाधिराजः ।
पूर्वापरौ तोयनिधी वगाह्य
स्थितः पृथिव्या इव मानदण्डः ॥ १ ॥

अनन्तरत्नप्रभवस्य यस्य
हिमं न सौभाग्यविलोपि जातम् ।
एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोः किरणेष्विवाङ्कः ॥ २ ॥

CC-O. Vidyabharathi Digital Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

यश्चाप्सरोविभ्रममण्डनानां
सम्पादयित्रीं शिखरैर्बिभर्ति ।
बलाहकच्छेदविभक्तरागाम्
अकालसन्ध्यामिव धातुमत्ताम् ॥ ३ ॥

आमेखलं सञ्चरतां घनानां
छायामधःसानुगतां निषेव्य ।
उद्वेजिता वृष्टिभिराश्रयन्ते
शृङ्गाणि यस्यातपवन्ति सिद्धाः ॥ ४ ॥

पदं तुषारस्रुतिधौतरक्तम्
यस्मिन्नदृष्ट्वापि हतद्विपानाम् ।
विदन्ति मार्गं नखरन्ध्रमुक्तैः
मुक्ताफलैः केसरिणां किरातः ॥ ५ ॥

न्यस्ताक्षरा धातुरसेन यत्र
भूर्जत्वचः कुञ्जरबिन्दुशोणाः ।
व्रजन्ति विद्याधरसुन्दरीणाम्
अनङ्गलेखक्रिययोपयोगम् ॥ ६ ॥

यः पूरयन् कीचकरन्ध्रभागान्
दरीमुखोत्थेन समीरणेन ।
उद्गास्यतामिच्छति किन्नराणां
तानप्रदायित्वमिवोपगन्तुम् ॥ ७ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कपोलकण्डूः करिभिर्विनेतुं
विघट्टितानां सरलद्रुमाणाम् ।
यत्र स्रुतक्षीरतया प्रसूतः
सानूनि गन्धः सुरभीकरोति ॥ ८ ॥

वनेचराणां वनितासखानां
दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्याम्
अतैलपूराः शयनप्रदीपाः ॥ ९ ॥

लाङ्गूलविक्षेपविसर्पिशोभैः
इतस्ततश्चन्द्रमरीचिगौरैः ।
यस्यार्थयुक्तं गिरिराजशब्दं
कुर्वन्ति वालव्यजनैश्चमर्यः ॥ १० ॥

भागीरथीनिर्झरशीकराणां
वोढा मुहुः कम्पितदेवदारुः ।
यद्वायुरन्विष्टमृगैः किरातैः ।
आसेव्यते भिन्नशिखण्डिबर्हः ॥ ११ ॥

सप्तर्षिहस्तावचितावशेषा-
ण्यधो विवस्वान् परिवर्तमानः ।
पद्मानि यस्याग्रसरोरुहाणि
प्रबोधयत्यर्ध्वमुखैर्मयूखैः ॥ १२ ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

गद्यभागः

चन्द्रापीडजननम्

अस्ति सकलभुवनललामभूता रसातलगम्भीरेण जलपरिखावलयेन परिवृता, कैलासगिरिणेव सुधासितेन प्राकारमण्डलेन परिगता, महावणिक्पथैरुपशोभिता, वदान्येन दक्षेण स्मितपूर्वाभिभाषिणा शिक्षिताशेषदेशभाषेण महाभारतपुराणरामायणानुरागिणा श्रुतरागिणा बृहत्कथाकुशलेन सुभाषितव्यसनिना विलासिजनेनाधिष्ठिता, सशैलेव प्रासादैः सशाखानगरेव महाभवनैः विजितामरलोकद्युतिरवन्तिषूज्जयिनी नाम नगरी। यस्यां सुरासुरचूडामणिमरीचिचुम्बितचरणनखमयूखो भगवान् महाकालाभिधानः उत्सृष्टकैलासवासप्रीतिः स्वयं निवसति।

एवंविधायां तस्यां नगर्यां नलनहुषययातिधुन्धुमारभरतभगीरथदशरथप्रतिमः फलितशक्तित्रयः नीतिशास्त्राखिन्नबुद्धिः, अधीतधर्मशास्त्रः तृतीय इव तेजसा कान्त्या च सूर्याचन्द्रमसोः, दशरथ इव सुमित्रोपेतः, पशुपतिरिव महासेनानुगतः, अवतार इव धर्मस्य, प्रतिनिधिरिव पुरुषोत्तमस्य, परिहृत प्रजापीडस्तारापीडो नाम राजा अभूत्।

तस्य च महीपतेः सकलशास्त्रकलाचतुरः, नीतिशास्त्रप्रयोगकुशलः, आशैशवात् उपारूढनिर्भरप्रेमरसः, महत्स्वपि

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कार्यसङ्कटेषु अविषण्णधीः, धाम धैर्यस्य, सेतुःसत्यस्य, धाता धर्मस्य, बृहस्पतिरिव शुनासीरस्य, वसिष्ठ इव दशरथस्य, सर्वकार्येष्वाहितमतिः, अमात्यः शुकनासो नामासीत् ।

स राजा तारापीडः बाल एव सुरकुञ्जरकरपीवरेण बाहुना विजित्य सप्तद्वीपवलयां वसुन्धरां, तस्मिन् मन्त्रिणि शुकनासे राज्यभारमारोप्य, सुस्थिताः प्रजाः कृत्वा, प्रायो विषयसुखान्यनुबभूव । शुकनासोऽपि महान्तं तं राज्यभारं अनायासेनैव प्रज्ञाबलेन बभार । यथैव राजा सर्वकार्याण्यकरोत्, तथैव असावपि द्विगुणीकृतप्रजानुरागश्चक्रे ।

एवं मन्त्रिणि विनिवेशितराज्यभारस्य यौवनसुखमनुभवतः तस्य राज्ञः कालो जगाम । प्रायः जीवलोकसुखानां सर्वेषामन्तं ययौ । एकं तु सुतमुखदर्शनसुखं न लेभे । यथा यथा च यौवनमतिचक्राम, तथा तथा विफलमनोरथस्य तस्य अनपत्यतासन्तापः समवर्धत । नरपतिसहस्रपरिवृतमपि असहायमिव, चक्षुष्मन्तमप्यन्धमिव आत्मानममन्यत ।

अथ तस्य चन्द्रलेखेव हरजटाकलापस्य, कौस्तुभप्रभेव कैटभारातिवक्षस्थलस्य, चन्दनवनराजिरिव मलयस्य, फणामणिशिखेव शेषस्य, भूषणमभूत् सकलान्तःपुरप्रधानभूता महिषी विलासवती नाम ।

एकदा सः तदावासगतः शोकमूकेन परिजनेन परिवृतां ताम् अन्तःपुरवृद्धानिराश्वास्यमानाम् अश्रुपाता-

CC-O. In Public Domain. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

व्रीकृतदुकूलाम्, अनलङ्कृताम्, असंयताकुलालकां पर्यङ्कोपविष्टां रुदतीं ददर्श। कृतप्रत्युत्थानां च तां तस्यामेव पर्यङ्किकायामुपवेश्य, स्वयं च उपविश्य, अविज्ञातबाष्पकारणः, करतलेन विगतबाष्पकणौ कपोलौ कुर्वन् भूपालस्तामवादीत्—"देवि, किमर्थम् अन्तर्गतशोकमन्थरं अशब्दं रुद्यते? कृशोदरि, किमर्थं नालङ्कृतासि? किमिति न पतितः चरणयोरलक्तकरसः? केन कारणेन न विभूषिता हारेण? प्रसीद, निवेदय, देवि, दुःखनिमित्तम्। किं क्वचिन्मयापराद्धम्? उत, अन्येन केनचित् अस्मदुपजीविना परिजनेन? अतिनिपुणं चिन्तयन्नपि न पश्यामि खलु स्खलितमल्पमपि मदीयं त्वद्विषये। त्वदायत्तं हि मे जीवितं च राज्यं च। कथ्यतां सुन्दरि, शुचः कारणम्" इत्येवमभिधीयमाना विलासवती यदा न किञ्चित्प्रतिवचः प्रतिपेदे, तदा विवृद्धबाष्पहेतुमस्याः परिजनमपृच्छत्।

अथ तस्याः ताम्बूलकरङ्कवाहिनी सततप्रत्यासन्ना मकरिका नाम राजानमुवाच—"देव, कुतो देवादल्पमपि परिस्खलितम्? अभिमुखे च देवे का शक्तिः परिजनस्य, अन्यस्य वा कस्यचिदपराद्धुम्? किं तु विफला किल चिरमस्मि, इत्ययमस्या देव्याः सन्तापः। सुमहांश्च कालः सन्तप्यमानायाः। प्रथममपि समुचितेष्वपि दिवसव्यापारेषु कथं कथमपि परिजनप्रयत्नात् प्रवर्त्यमाना देवी

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सशोकैवासीत्। देवहृदयपीडापरिजिहीर्षया न दर्शितवती विकारम्। अद्य तु चतुर्दशीति भगवन्तं महाकालमर्चितुमितो गता, तत्र महाभारते वाच्यमाने श्रुतमनया—'अपुत्राणां किल न सन्ति लोकाः शुभाः, पुन्नाम्नो नरकात् त्रायत इति पुत्रः' इति। एतत् श्रुत्वा भवनमागत्य, परिजनेन प्रार्थ्यमानापि नाहारमभिनन्दति। न भूषणपरिग्रहमाचरति। नोत्तरं प्रतिपद्यते। केवलमेवं रोदिति। एतदाकर्ण्य देवः प्रमाणम्" इत्यभिधाय विरराम।

विरतवचनायां च तस्यां भूपालस्तूष्णीं मुहूर्तमिव स्थित्वा दीर्घमुष्णं च निश्वस्य निजगाद—'देवि, किमत्र क्रियतां दैवायत्ते वस्तुनि? अतिमात्रमलं रुदितेन। न वयमनुग्राह्याः प्रायो देवतानाम्। अन्यस्मिन् जन्मनि न कृतमवदातं कर्म। जन्मान्तरकृतं हि कर्म फलमुपनयति पुरुषस्येह जन्मनि। न हि शक्यं दैवमन्यथा कर्तुम्। यावत् मानुष्यके शक्यमाचरितुं तावत्सर्वमुपपद्यताम्। अधिकां कुरु देवि, गुरुषु भक्तिम्। द्विगुणमुपपादय देवतासु पूजाम्। ऋषिजनसपर्यासु दर्शितादरा भव। परं हि दैवतमृषयः। यत्नेनाराधिता अतिदुर्लभानामपि वराणां दातारो भवन्ति। पुरा कौशिकप्रभावात् बृहद्रथो राजा जरासन्धं नाम तनयं लेभे। दशरथश्च राजा परिणतवयाः ऋष्यशृङ्गस्य प्रसादादवाप चतुरः पुत्रान्, अमोघफला

CC-O. Mumukshu Bhawan Varanasi Collection. Digitized by eGangotri

CC-O. In Public Domain. Digitized by eGangotri

हि महामुनिसेवा भवति। मामपि दहत्येव अहर्निश-मयमनपत्यतासमुद्भवः शोकः। शून्यमिव मे प्रतिभाति जगत्। अफलमिव पश्यामि राज्यम्। अप्रतिविधेये तु विधातरि किं करोमि? तन्मुच्यतामयं देवि, शोकानु-बन्धः। आधीयतां धैर्ये धर्मे च धीः। धर्मपरायणानां हि सदा समीपसञ्चारिण्यः कल्याणसम्पदो भवन्ति। इत्येवमभिधाय, सलिलमादाय स्वयमस्याः साश्रुलेखं आननं ममार्ज। पुनः पुनः प्रियशतमधुराभिः वाग्भिराश्वास्य, सुचिरं स्थित्वा, नरेन्द्रो निर्जगाम।

निर्गते च तस्मिन् मन्दीभूतशोका विलासवती उचितं दिवसव्यापारमन्वतिष्ठत्। ततः प्रभृति सुतरां देवता-राधनेषु ब्राह्मणपूजासु गुरुजनसपर्यासु च आदरवती बभूव। न महान्तमपि क्लेशमगणयत्। यद्यच्च किञ्चित् कुतश्चित् शुश्राव, गर्भतृष्णया तत्तत्सर्वं चकार।

एवं च गच्छति काले राजा कदाचित् क्षीण-भूयिष्ठायां रजन्यां स्वप्ने, विलासवत्याः आनने प्रविशन्तं परिपूर्णमण्डलं चन्द्रं ददर्श। प्रबुद्धश्चोत्थाय, तस्मिन्नेव क्षणे समाहूय शुकनासं, तस्मै तं स्वप्नमकथयत्। स तु समुपजातहर्षः प्रत्युवाच—"देव, सम्पन्नाः सुचिरादस्माकं मनोरथाः। कतिपयैरेव दिवसैरसन्देहं सुतमुखावलोकन-सुखं अनुभवति भवान्। अद्य खलु मयापि निशि स्वप्ने,

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

दिव्याकृतिना द्विजेन विकचं पुण्डरीकं देव्या मनोरमाया उत्सङ्गे निहितं दृष्टम्। आवेदयन्ति हि प्रत्यासन्नमानन्दं शुभानि निमित्तानि। अवितथफलाश्च प्रायो निशावसान-समयदृष्टा भवन्ति स्वप्नाः। सर्वथा नचिरेण भुवनानन्द-हेतुमात्मजं जनयिष्यति देवी" इति। एवमभिदधान-मेव तं करेण गृहीत्वा नरेन्द्रः प्रविश्याभ्यन्तरं ताभ्यां स्वप्नाभ्यां विलासवतीमानन्दयामास।

कतिपयदिवसापगमे च देवताप्रसादात् विवेश गर्भो विलासवतीम्। शनैः शनैः प्रतिदिनमुपचीयमानगर्भा मन्दं मन्दं सञ्चचार। मुहुर्मुहुः सालसं निशश्वास। तथावस्थां तां आलोक्य इङ्गितकुशलः परिजनो विज्ञातवान्।

अथ तस्याः परिजनप्रधानभूता कुलवर्धना नाम परिचारिका, प्रशस्ते दिवसे प्रदोषवेलायां शुकनासेन सह तास्ताः कथाः कुर्वाणं भूमिपालमुपसृत्य विदितं विलासवती-वृत्तान्तमकारोत्। तदाकर्ण्य तारापीडः उच्मुच्य स्वाङ्गेभ्यो भूषणानि कुलवर्धनायै दत्वा, सह शुकनासेनोत्थाय हर्ष-विशेषनिर्भरेण त्वर्यमाणो मनसा, अन्तःपुरं प्रविश्य विलासवतीं ददर्श।

अथ तामुपारूढगर्भामालोकय, प्रस्तुतपरिहासो राजा 'देवि, शुकनासः पृच्छति—यदाह कुलवर्धना किमपि, तत्किं

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तथैव ?" इत्युवाच। तत् श्रुत्वा लज्जया विलासवती तत्क्षणमधोमुखी तस्थौ।

ततः क्रमेण, पूर्णे प्रसवसमये, पुण्येऽहनि, प्रशस्तायां वेलायां विलासवती सकललोकहृदयानन्दकारिणं सुतमसूत। तस्मिन् जाते मङ्गलपटहपटुरवसंवर्धितेन उत्सवकोलाहलेन सान्तःपुराः सप्रकृतयः सराजलोकाः सबालवृद्धा आगोपालं हर्षनिर्भराः प्रजाः उन्मत्ता इव ननृतुः।

पार्थिवस्तु तनयाननदर्शनसमुत्सुकोऽपि दैवज्ञगणोपदिष्टे प्रशस्ते मुहूर्ते निवारितनिखिलपरिजनः, शुकनासद्वितीयः सूतिकागृहमेत्य, अम्भः पावकञ्च स्पृष्ट्वा विवेश। तत्र चोत्सङ्गगतं विलासवत्याः उदयपरिपाटलमण्डलं सवितारमिव, अपरसन्ध्यालोहितं चन्द्रबिम्बमिव, विद्रुमकिसलयदलैरिव रचितावयवं, सहजभूषणैरिव महापुरुषलक्षणैरुपेतं आह्लादहेतुमात्मजं ददर्श। कृतकृत्यं चात्मानं मेने। शुकनासस्तु शनैःशनैरस्य अङ्गप्रत्यङ्गानि निरूपयन् प्रीतिविस्तारितलोचनो भूमिपालमवदत्—देव, पश्य, पश्य, अस्य कुमारस्य माहात्म्यमाविर्भावयन्ति चक्रवर्तिचिह्नानि। अस्य बालशशिकलाकारे ललाटपट्टे तन्वीयमूर्णा परिस्फुरति। प्रशस्तलेखालाञ्छितौ शङ्खचक्रचिह्नौ. लोहिततलौ करौ। एष च दुन्दुभेरिव गम्भीरः स्वरयोगोऽस्य रुदतः श्रूयते" इति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

एवं कथयत्येव तस्मिन्, मङ्गलनामा पुरुषः त्वरितगतिरागत्य, पादयोः प्रणम्य राजानं व्यजिज्ञपत्—"देवः दिष्ट्या वर्धसे। प्रतिहतास्ते शत्रवः। चिरं जीव, जय च पृथिवीम्। अत्रभवतः शुकनासस्यापि मनोरमायां तनयो जातः। श्रुत्वा देवः प्रमाणम्" इति।

अथ नृपतिराकर्ण्य तद्वचनं प्रत्यवदत्—"अहो कल्याणपरम्परा। सत्योऽयं जनप्रवादः—यद्विपद्विपदं, सम्पत्सम्पदमनुबध्नातीति"। इत्यभिधाय प्रीतिविकसितमुखः सरभसं शुकनासमालिलिङ्ग। ततस्तेन सह विविधवाद्यकृतकोलाहलेन पठता गायता च चारणगणेन अनुगम्यमानः शुकनासभवनं गत्वा द्विगुणतरमुत्सवमकारयत्।

ततः प्राप्ते दशमेऽहनि, पुण्ये मुहूर्ते, गाः सुवर्णञ्च कोटिशो द्विजेभ्यो दत्वा, स्वप्नानुरूपमेव राजा स्वसूनोः चन्द्रापीड इति नाम चकार।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

"कर्णभारम्"

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

सूत्रधार :—

नरमृगपतिवर्ष्मालोकनभ्रान्तनारी-
नरदनुजसुपर्वव्रातपाताललोकः ।
करजकुलिशपालीभिन्नदैत्येन्द्रवक्षाः
सुररिपुबलहन्ता श्रीधरोऽस्तु श्रिये वः ॥ १ ॥

एवम् आर्यमिश्रान् विज्ञापयामि। (परिक्रम्य, कर्णं दत्वा) अये, किं नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते। अङ्ग ! पश्यामि ।

(नेपथ्ये)

भो भो ! निवेद्यतां निवेद्यतां महाराजायाङ्गेश्वराय।

सूत्रधार :—भवतु, विज्ञातम् !

सङ्ग्रामे तुमुले जाते कर्णाय कलिताञ्जलिः ।
निवेदयति सम्भ्रान्तो भृत्यो दुर्योधनाज्ञया ॥ २ ॥

(निष्क्रान्तः)

प्रस्तावना

(ततः प्रविशति भटः)

भटः—भो भो ! निवेद्यतां निवेद्यतां महाराजायाङ्गेश्वराय युद्धकाल उपस्थित इति। (परिक्रम्य, विलोक्य) अये, अयमङ्गराजः समरपरिच्छदपरिवृतः शल्यराजेन

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

सह स्वभवनान्निष्क्रम्येत एवाभिवर्तते। भोः किं नु खलु युद्धोत्सवप्रमुखस्य दृष्टपराक्रमस्याभूतपूर्वो हृदयपरितापः। एष हि

अत्युग्रदीप्तविशदः समरेऽग्रगण्यः
शौर्येच सम्प्रति सशोकमुपैति धीमान्।
प्राप्ते निदाघसमये घनराशिरुद्धः
सूर्यः स्वभावरुचिमानिव भाति कर्णः ॥ ३ ॥

यावदपसर्पामि। (निष्क्रान्तः)

(ततः प्रविशति यथानिर्दिष्टः कर्णः शल्यश्च)

कर्ण :—शल्यराज! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः।

शल्य :—बाढम्। (चोदयति)

कर्ण :— अहो नु खलु

अन्योन्यशस्त्रविनिपातनिकृत्तगात्र-
योधाश्वकारणरथेषु महाहवेषु।
क्रुद्धान्तकप्रतिमविक्रमिणो समापि
वैधुर्यमापतति चेतसि युद्धकाले ॥ ४ ॥

भोः कष्टम्।

पूर्वं कुन्त्यां समुत्पन्नो राधेय इति विश्रुतः।
युधिष्ठिरादयस्ते मे यवीयांसस्तु पाण्डवाः ॥ ५ ॥

अयं स कालः क्रमलब्धशोभनो
गुणप्रकर्षो दिवसोऽयमागतः।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

निरर्थमस्त्रं च मया हि शिक्षितं
पुनश्च मातुर्वचनेन वारितः ॥ ६ ॥

भोः शल्यराज, श्रूयतां ममास्त्रस्य वृत्तान्तः ।

शल्य :—ममाप्यस्ति कौतूहलमेनं वृत्तान्तं श्रोतुम् ।

कर्ण :— पूर्वमेवाहं जामदग्न्यस्य सकाशं गतवानस्मि ।

शल्य :—ततस्ततः ।

कर्ण :— ततो जामदग्न्येन प्रणतस्य ममाशीर्वचनं दत्वा पृष्टोऽस्मि । को भवान् किमर्थमिहागत इति ।

शल्य :—ततस्ततः ।

कर्ण :— ततः भगवन्, अखिलान्यस्त्राण्युपशिक्षितुमिच्छामीत्युक्तवानस्मि ।

शल्य :—ततस्ततः ।

कर्ण :— तत उक्तोऽहं भगवता, ब्राह्मणेषूपदेशं करिष्यामि न क्षत्रियाणामिति ।

शल्य :—अस्ति खलु भगवतः क्षत्रियवंश्यैः पूर्ववैरम् । ततस्ततः ।

कर्ण :— ततो नाहं क्षत्रियः इत्यस्त्रोपदेशं ग्रहीतुमारब्धं मया ।

शल्य :—ततस्ततः ।

कर्ण :— ततः कतिपयकालातिक्रमे कदाचित्फलमूलसमित्कुशकुसुमाहरणाय गतवता गुरुणा सहानुगतोऽस्मि ।

शल्य :—ततस्ततः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कर्ण :— ततः स गुरुर्वनभ्रमणपरिश्रमान्मदङ्के निद्रावश-
मुपगतः ।

शल्य :—ततस्ततः ।

कर्ण :— ततः

कृते वज्रमुखेन नाम कृमिणा दैवान्ममोरुद्वये
निद्राच्छेदभयादसह्यत गुरोर्धैर्यात्तदावेदना ।
उत्थाय क्षतजाप्लुतः स सहसा रोषानलोद्दीपितो
बुद्ध्वा मां च शशाप कालविफलान्यस्त्राणि ते
सन्त्विति ॥ ७ ॥

शल्य :—अहो कष्टमभिहितं तत्रभवता ।

कर्ण :— परीक्षामहे तावदस्त्रस्य वृत्तान्तम् । (तथा कृत्वा)
एतान्यस्त्राणि निर्वीर्याणीव लक्ष्यन्ते ।
शङ्खदुन्दुभयश्च निःशब्दाः ।

शल्य :—भोः कष्टम्, किं नु खल्विदम् ।

कर्ण :— शल्यराज ! अलमलं विषादेन ।
हतोऽपि लभते स्वर्गं जित्वा तु लभते यशः ।
उभे बहुमते लोके नास्ति निष्फलता रणे ॥ ८ ॥

अक्षयोऽस्तु गोब्राह्मणानाम् । अक्षयोऽस्तु पतिव्रतानाम् ।
अक्षयोऽस्तु रणेष्वपराङ्मुखानां योधपुरुषाणाम् ।
अक्षयोऽस्तु मम प्राप्तकालस्य । एष भोः प्रसन्नोऽस्मि ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

समरमुखमसह्यं पाण्डावानां प्रविश्य
प्रथितगुणगणाढ्यं धर्मराजं च बद्ध्वा ।
मम शरवरवेगैरर्जुनं पातयित्वा
वनमिव हतसिंहं सुप्रवेशं करोमि ॥ ९ ॥

शल्यराज ! यावद्रथमारोहावः ।

शल्य :—बाढम् ।

(उभौ रथारोहणं नाटयतः)

कर्ण :—शल्यराज ! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः ।

(नेपथ्ये)

भोः कर्ण ! महत्तरां भिक्षां याचे ।

कर्ण :—(आकर्ण्य) अये वीर्यवान् शब्दः ।

श्रीमानेष न केवलं द्विजवरो यस्मात्प्रभावो महा-
नाकर्ण्य स्वरमस्य धीरनिनदं चित्रार्पिताङ्ग इव ।
उत्कर्णस्तिमिताञ्चिताक्षवलितग्रीवार्पिताग्रानना-
स्तिष्ठन्त्यस्ववशाङ्गयष्टि सहसा यान्तो ममैते
हयाः ॥ १० ॥

आहूयतां स विप्रः । न, न, अहमेवाह्वयामि । भगवन्, इत इतः ।

(ततः प्रविशति ब्राह्मणरूपेण शक्रः)

शक्र :— भो मेघाः सूर्येणैव निवर्त्य गच्छन्तु भवन्तः ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

(कर्णमुपगम्य) भोः कर्ण ! महत्तरां भिक्षां याचे।

कर्ण:— दृढं प्रीतोऽस्मि भगवन् !

यातः कृतार्थगणनामहमद्य लोके
राजेन्द्रमौलिमणिरञ्जितपादपद्मः ।
विप्रेन्द्रपादरजसा तु पवित्रमौलिः
कर्णो भवन्तमहमेष नमस्करोमि ॥ ११ ॥

शक्र:— (आत्मगतम्) किं नु खलु मया वक्तव्यं, यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति। यदि न वक्ष्ये मूढ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि। भवतु, दृष्टम्। (प्रकाशम्) भोः कर्ण ! सूर्य इव, चन्द्र इव, हिमवानिव, सागर इव, तिष्ठतु ते यशः।

कर्ण:— भगवन् ! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्। कुतः—

धर्मो हि यत्नैः पुरुषेण साध्यो
भुजङ्गजिह्वाचपला नृपश्रियः ।
तस्मात्प्रजापालनमात्रबुद्धया
हतेषु देहेषु गुणा धरन्ते ॥ १२ ॥

भगवन् किमिच्छसि। किमहं ददामि ?

शक्र:— महत्तरां भिक्षां याचे।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कर्ण :— महत्तरां भिक्षां भवते प्रदास्ये। श्रूयतां मद्विभवाः।
गुणवदमृतकल्पक्षीरधाराभिवर्षि
द्विजवर! रुचितं ते तृप्तवत्सानुयात्रम्।
तरुणमधिकमर्थिप्रार्थनीयं पवित्रं
विहितकनकशृङ्गं गोसहस्रं ददामि ॥ १३ ॥

शक्र :— गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण! नेच्छामि!!

कर्ण :— किं नेच्छति भवान्। इदमपि श्रूयताम्।
सुगुणमनिलवेगं युद्धदृष्टापदानं
सपदि बहुसहस्रं वाजिनां ते ददामि॥

शक्र :— अश्व इति! मुहूर्तकमारोहामि। नेच्छामि कर्ण! नेच्छामि।

कर्ण :— किं नेच्छति भगवान्। अन्यदपि श्रूयताम्।
सितनखदशनानां वारणानामनेकं
रिपुसमरविमर्दं वृन्दमेतद् ददामि॥

शक्र :— गज इति। मुहूर्तकमारोहामि। नेच्छामि कर्ण! नेच्छामि।

कर्ण :— किं नेच्छति भवान्। अन्यदपि श्रूयताम्। अपर्याप्तं कनकं ददामि।

शक्र :— गृहीत्वा गच्छामि। (किञ्चित् गत्वा) नेच्छामि कर्ण! नेच्छामि।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कर्ण :— तेन हि जित्वा पृथिवीं ददामि ।

शक्र :— पृथिव्या किं करिष्यामि ?

कर्ण :— तेन ह्यग्निष्टोमफलं ददामि ।

शक्र :— अग्निष्टोमफलेन किं कार्यम् ?

कर्ण :— तेन हि मच्छिरो ददामि ।

शक्र :— अविहा अविहा ।

कर्ण :— न भेतव्यं न भेतव्यम् । प्रसीदतु भवान् । अन्यदपि श्रूयताम् ।

अङ्गैः सहैव जनितं मम देहरक्षा
देवासुरैरपि न भेद्यमिदं सहस्रैः ।
देयं तथापि कवचं सह कुण्डलाभ्यां
प्रीत्या मया भगवते रुचितं यदि स्यात् ॥१४॥

शक्र :— (सहर्षम्) ददातु ददातु ।

कर्ण :— (आत्मगतम्) एष एवास्य कामः । किं नु खल्वनेक-कपटबुद्धेः कृष्णस्योपायः । सोऽपि भवतु । धिगयुक्तमनुशोचितुम् । नास्ति संशयः । (प्रकाशम्) गृह्यताम् ।

शल्य :— अङ्गराज ! न दातव्यं न दातव्यम् ।

कर्ण :— शल्यराज ! अलमलं वारयितुम्, पश्य

Sri Vidyabharathi Book Centre, Shringeri

CC-O. In Public Domain. Digitized by eGangotri

शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ॥ १५ ॥

तस्मात् गृह्यताम् । (निकृत्य ददाति)

शक्र :— (गृहीत्वा आत्मगतम्) हन्त, गृहीते एते । पूर्वमेवाहमर्जुनविजयार्थं सर्वदेवैर्यत् समर्थितं तदिदानीं मयानुष्ठितम् । तस्मादहमप्यैरावतम् आरुह्यार्जुनकर्णयोर्द्वन्द्वयुद्धं पश्यामि । (निष्क्रान्तः)

शल्यः :—भो अङ्गराज ! वञ्चितः खलु भवान् ।

कर्ण :— केन ?

शल्य :—शक्रेण ।

कर्ण :— न खलु । शक्रः खलु मया वञ्चितः । कुतः,

अनेकयज्ञाहुतितर्पितो द्विजैः
किरीटवान् दानवसङ्घमर्दनः ।
सुरद्विषास्फालनकर्कशाङ्गुलि-
र्मया कृतार्थः खलु पाकशासनः ॥ १६ ॥

(प्रविश्य ब्राह्मणरूपेण)

देवदूत :—भोः कर्ण ! कवचकुण्डलग्रहणाज्जनितपश्चात्तापेन पुरन्दरेणानुगृहीतोऽसि । पाण्डवेष्वेकपुरुषवधार्थममोघमस्त्रं विमला नाम शक्तिरियं प्रतिगृह्यताम् ।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

कर्ण :— धिक्, दत्तस्य न प्रतिगृह्णामि ।

देवदूत :—ननु ब्राह्मणवचनाद् गृह्यताम् ।

कर्ण :— ब्राह्मणवचनमिति । न मयातिक्रान्तपूर्वम् । कदा लभेय ।

देवदूत :—यदा स्मरसि तदा लभस्व ।

कर्ण :— बाढम् । अनुगृहीतोऽस्मि । प्रतिनिवर्ततां भवान् ।

देवदूत :—बाढम् । (निष्क्रान्तः)

कर्ण :— शल्यराज । यावद्रथमारोहावः ।

शल्य :—बाढम् (रथारोहणं नाटयतः)

कर्ण :— अये शब्द इव श्रूयते । किं नु खल्विदम् ।

शङ्खध्वनिः प्रलयसागरघोषतुल्यः
कृष्णस्य वा न तु भवेत्स तु फाल्गुनस्य ।
नूनं युधिष्ठिरपराजयकोपितात्मा
पार्थः करिष्यति यथाबलमद्य युद्धम् ॥१७॥

शल्यराज ! यत्रासावर्जुनस्तत्रैव चोद्यतां मम रथः ।

शल्य :— बाढम् ।

(भरतवाक्यम्)

सर्वत्र सम्पदः सन्तु नश्यन्तु विपदः सदा ।
राजा राजगुणोपेतो भूमिमेकः प्रशास्तु नः ॥ १८ ॥

(निष्क्रान्तौ)

"कर्णभारमवसितम्"

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

उत्तरार्धम्

शुकनासोपदेशः

तात, चन्द्रापीड, विदितवेदितव्यस्य अधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति। केवलं च निसर्गत एव अभानुभेद्यं अप्रदीपप्रभापनेयं अतिगहनं तमो यौवनप्रभवम्। अपरिणामोपशमो दारुणो लक्ष्मीमदः। अनञ्जनवर्तिसाध्यमपरमैश्वर्यतिमिरान्धत्वम्, इत्यतो विस्तरेणाभिधीयसे।

गर्भेश्वरत्वं, अभिनवयौवनत्वं, अप्रतिमरूपत्वं, अमानुषशक्तित्वं चेति महतीयं खल्वनर्थपरम्परा। सर्वाविनयानामेकैकमप्येषामायतनम्, किमुत समवायः। यौवनारम्भे च प्रायः शास्त्रजलप्रक्षालननिर्मलापि कलुषतामुपयाति बुद्धिः। अपहरति वात्येव शुष्कपत्रं, समुद्भूतरजोभ्रान्तिः अतिदूरमात्मेच्छया यौवनसमये पुरुषं प्रकृतिः। नाशयति च दिङ्मोह इव उन्मार्गप्रवर्तकः पुरुषमत्यासङ्गो विषयेषु।

भवादृशा एव भवन्ति भाजनान्युपदेशानाम्। अपगतमले हि मनसि स्फटिकमणाविव रजनिकरगभस्तयो विशन्ति सुखमुपदेशगुणाः। गुरुवचनममलमपि सलिलमिव महदुपजनयति श्रवणस्थितं शूलमभव्यस्य। इतरस्य तु करिण इव शङ्खाभरणम् आननशोभासमुदयमधिकतरमुपजनयति।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

हरति च सकलम् अतिमलिनमप्यन्धकारमिव दोषजातं प्रदोषसमये निशाकर इव गुरूपदेशः। प्रशमहेतुर्वयः-परिणाम इव पलितरूपेण शिरसिजजालमभलीकुर्वन् गुणरूपेण तदेव परिणमयति। अयमेव चानास्वादित-विषयरसस्य ते काल उपदेशस्य। विषयविषसंमूर्छिते हि हृदये जलमिव गलत्युपदिष्टम्। अकारणं च भवति दुष्प्रकृतेरन्वयः श्रुतं वा विनयस्य। चन्दनप्रभवो न दहति किमनलः? किं वा प्रशमहेतुनापि न प्रचण्डतरीभवति वडवानलो वारिणा।

गुरूपदेशश्च नाम पुरुषाणाम् अखिलमलप्रक्षालनक्षम-मजलं स्नानम्, अनुपजातपलितादिवैरूप्यमजरं वृद्धत्वम्, असुवर्णविरचनमग्राम्यं कर्णाभरणम्। अपनीतज्योति-रालोकः, नोद्वेगकरः प्रजागरः। विशेषेण तु राज्ञाम्। विरला हि तेषामुपदेष्टारः। प्रतिशब्दक इव राजवचन-मनुगच्छति जनो भयात्। उद्दामदर्पश्चयथुस्थगितश्रवण-विवराश्चोपदिश्यमानमपि ते न शृण्वन्ति। शृण्वन्तोऽपि च गजनिमीलितेनावधीरयन्तः खेदयन्ति हितोपदेशदायिनो गुरून्। अहङ्कारदाहज्वरमूर्छान्धकारिता विह्वला हि राजप्रकृतिः। अलीकाभिमानोन्मादकराणि धनानि। राज्यविषविकारतन्द्रीप्रदा राजलक्ष्मीः।

आलोकयतु तावत् कल्याणाभिनिवेशी लक्ष्मीमेव प्रथमम्। इयं हि सुभटखड्गमण्डलोत्पलवनविभ्रमभ्रमरी

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दु-शकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, काल-कूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेरति-नैष्ठुर्यम् इत्येतानि सहवासपरिचयवशात् विरहविनोद-चिह्नानि गृहीत्वेवोद्गता। न ह्येवंविधमपरमपरिचित-मिह जगति किञ्चिदस्ति यथेयमनार्या। लब्धापि खलु दुःखेन परिपाल्यते। दृढगुणपाशसन्दानितापि नश्यति। न परिचयं रक्षति। नाभिजनमीक्षते। न रूपमालोकयते। न कुलमनुवर्तते। न शीलं पश्यति। न वैदग्ध्यं गणयति। न श्रुतमाकर्णयति। न धर्ममनुरुध्यते। न त्यागमाद्रियते। न विशेषज्ञतां विचारयति।

एवं विधयापि चानया कथमपि दैववशेन परिगृहीता विक्लवीभवन्ति राजानः। सर्वाविनयाधिष्ठानतां च गच्छन्ति। मिथ्यामाहात्म्यगर्वनिर्भराश्च न प्रणमन्ति देवताभ्यः, न मानयन्ति मान्यान्, नार्चयन्त्यर्चनीयान्, नाभिवादयन्त्यभिवादनार्हान्, नाभ्युत्तिष्ठन्ति गुरून्। अनर्थकायासान्तरितविषयोपभोगसुखम् इत्युपहसति विद्व-ज्जनम्। जरावैक्लव्यप्रलपितमिति पश्यन्ति वृद्धजनोप-देशम्। आत्मप्रज्ञापरिभव इत्यसूयन्ति सचिवोपदेशाय। कुप्यन्ति हितवादिने। सर्वथा तमभिनन्दन्ति, तमालपन्ति, तं पार्श्वे कुर्वन्ति, तं संवर्धयन्ति, तेन सह सुखमवतिष्ठन्ते, तस्मै ददति, तं मित्रतामुपनयन्ति, तस्य वचनं शृण्वन्ति,

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

तं बहुमन्यन्ते, तमाप्ततामापादयन्ति, योऽहर्निशमनवरत-मुपरचिताञ्जलिरधिदैवतमिव विगतान्यकर्तव्यः स्तौति, यो वा माहात्म्यमुद्भावयति। किं वा तेषां साम्प्रतं येषामति-नृशंसप्रायोपदेशनिर्घृणं कौटिल्यशास्त्रं प्रमाणम्, अभिचार-क्रियाक्रूरैकप्रकृतयः पुरोधसो गुरवः, पराभिसन्धानपरा मन्त्रिण उपदेष्टारः, सहजप्रेमार्द्रहृदयानुरक्ता भ्रातर उच्छेद्याः।

तदेवंप्रायेऽतिकुटिलचेष्टासहस्रदारुणे राज्यतन्त्रेऽ-स्मिन् महामोहकारिणि च यौवने, कुमार, तथा प्रयतेथाः, यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक् क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः। कामं भवान् प्रकृत्यैव धीरः। पित्रा च महता प्रयत्नेन समारोपितसंस्कारः। तरलहृदयमप्रतिबुद्धं च मदयन्ति धनानि। तथापि भवद्गुणसन्तोषः मामेवं मुखरितवान्।

———

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अलङ्काराः

उपमा

उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ।
हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ।।

रूपकम्

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तत् त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ।

अयं हि धूर्जटिः साक्षात् येन दग्धाः पुरः क्षणात् ।
अयमास्ते विना शम्भुः तार्तीयीकं विलोचनम् ।

शम्भुः विश्वमवत्यद्य स्वीकृत्य समदृष्टिताम् ।
अस्या मुखेन्दुना लब्धे नेत्रानन्दे किमिन्दुना ।

साध्वीयमपरा लक्ष्मीरसुधासागरोदिता ।
अयं कलङ्किनश्चन्द्रात् सुखचन्द्रोऽतिरिच्यते ।

उत्प्रेक्षा

सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना ।
उक्तानुक्तास्पदाद्यात्र सिद्धासिद्धास्पदे परे ।।

धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवम् ।
त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी ॥

मध्यः किं कुचयोः धृत्यै बद्धः कनकदामभिः ।
प्रायोऽब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ॥

अतिशयोक्तिः

रूपकातिशयोक्तिः स्यात् निगीर्याध्यवसानतः ।
पश्य नीलोत्पलद्वन्द्वात् निस्सरन्ति शिताः शराः ॥

यद्यपह्नुतिगर्भत्वं सैव सापह्नवा मता ।
त्वत्सूक्तिषु सुधा राजन् भ्रान्ताः पश्यन्ति तां विधौ ॥

भेदकातिशयोक्तिः स्यात् तस्यैवान्यत्ववर्णनम् ।
अन्यदेवास्य गाम्भीर्यम् अन्यद्धैर्यं महीपतेः ॥

असम्बन्धातिशयोक्तिः स्यादयोगे योगकल्पनम् ।
सौधाग्राणि पुरस्यास्य स्पृशन्ति विधुमण्डलम् ॥

योगेऽप्ययोगः सम्बन्धातिशयोक्तिरितीर्यते ।
त्वयि दातरि राजेन्द्र स्वर्द्रुमान्नाद्रियामहे ॥

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अक्रमातिशयोक्तिः स्यात् सहत्वे हेतुकार्ययोः ।
आलिङ्गन्ति समं देव ज्यां शराश्च पराश्च ते ।।

चपलातिशयोक्तिः स्यात् कार्ये हेतुप्रसक्तिजे ।
यास्यामीत्युदिते तन्व्याः वलयोऽभवदूर्मिका ।।

अत्यन्तातिशयोक्तिः स्यात् पौर्वापर्यव्यतिक्रमे ।
अग्रे मानो गतः पश्चात् अनुनीता प्रियेण सा ।।

श्लेषः

नानार्थसंश्रयः श्लेषः वर्ण्यावर्ण्योभयाश्रितः ।
सर्वदोमाधवः पायात् स योगङ्गामदीधरत् ।।

अब्जेन त्वन्मुखं तुल्यं हरिणा हितसक्तिना ।
उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ।।

अप्रस्तुतप्रशंसा

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया ।
एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ।।

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

अर्थान्तरन्यासः

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः ।
हनूमानब्धिमतरत् दुष्करं किं महात्मनाम् ।।

वक्रोक्तिः

वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम् ।
मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके ।।

अङ्गुल्या कः कपाटं प्रहरति कुटिले माधवः किं वसन्तः
नो चक्री किं कुलालो न हि धरणिधरः किं द्विजिह्वः फणीन्द्रः ।
नाहं घोराहिमर्दी किमसि खगपतिः नो हरिः किं कपीन्द्रः
इत्थं राधाविवादप्रतिपदवचनः पातु वः पद्मनाभः ।।

भिक्षार्थी क्व प्रयातः सुतनु बलिमुखे ताण्डवं क्वाद्य भद्रे
मन्ये वृन्दावनान्ते क्व नु स मृगशिशुः नैव जाने वराहम् ।
बाले कच्चिन्न दृष्टो जरठवृषपतिः गोप एवास्य वेत्ता
लीलासंलाप इत्थं जलनिधिहिमवत्कन्ययोस्त्रायतां नः ।।

बेंगलरु प्रेस, मैसूरु रोड्, बेंगलूरु-१८
Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಪ್ರಥಮ ಮುದ್ರಣ 1973

ಹಕ್ಕನ್ನು ಕಾದಿರಿಸಲಾಗಿದೆ

पुरे ग्रामे गृहे कुटयां
बालो वृद्धो युवापि च ।
करोतु संस्कृताभ्यासं
प्राप्नोतु परमं सुखम् ।।

ಈ ಪುಸ್ತಕವು ದೊರೆಯುವ ಸ್ಥಳ:
ಶ್ರೀ ಸುರಸರಸ್ವತೀ ಸಭಾ
ಶ್ರೀ ಶಂಕರಮಠ
ಮೈಸೂರು-4

Sri Vidyabharathi Book Centre, Sringeri

CC-O. In Public Domain. Digitized by eGangotri

ಸಂಸ್ಕೃತ ಭಾಷೆಯು ಅತಿ ಪುರಾತನವಾದುದು. ಇದು ದೇಶ ಭಾಷೆಗಳಿಗೆಲ್ಲ ಮೂಲ. ಇದನ್ನು ಭಾರತೀಯರಾದ ನಾವು ಕಡೆಗಾಣಿಸಿರುವುದು ಶೋಚನೀಯ. ನಮ್ಮ ಸಂಸ್ಕೃತಿಯನ್ನರಿಯಲು ಈ ಭಾಷೆಯು ಅಗತ್ಯ. ಇದನ್ನರಿತು ಎಲ್ಲರೂ ಇದರ ಪ್ರಯೋಜನವನ್ನು ಪಡೆಯಬೇಕು. ಎಲ್ಲೆಡೆಯೂ ಈ ಭಾಷೆಯು ಹರಡಬೇಕು. ಇದಕ್ಕಾಗಿ ಶೃಂಗಗಿರಿ ಶ್ರೀ ಶಾರದಾಪೀಠಾಧಿಪತಿಗಳವರ ಕೃಪೆಯಿಂದ ಶ್ರೀ ಸುರಸರಸ್ವತೀ ಸಭೆಯು ಆರಂಭವಾಗಿದೆ.

ಇದರ ಆಶ್ರಯದಲ್ಲಿ ಸುಲಭವಾದ ಹೊಸರೀತಿಯ ಪಠ್ಯ ಪುಸ್ತಕಗಳು ಮುದ್ರಿತವಾಗಿವೆ. ವರ್ಷಕ್ಕೆ ಎರಡು ಬಾರಿ ಸರಳ ಪರೀಕ್ಷೆಗಳು ನಡೆಸಲ್ಪಡುತ್ತವೆ. ವಿವರಗಳಿಗೆ ಈ ಕೆಳಗಿನ ವಿಳಾಸಕ್ಕೆ ಬರೆಯಿರಿ.

ಶ್ರೀ ಸುರಸರಸ್ವತೀ ಸಭಾ
ಶ್ರೀ ಶಂಕರಮಠ, ಮೈಸೂರು-೪

---

① ಸಂಸ್ಕೃತವನ್ನು ಕಲಿಯಿರಿ
② ನಮ್ಮ ಸಂಸ್ಕೃತಿಯನ್ನು ತಿಳಿಯಿರಿ
③ ಸುಖವನ್ನು ಪಡೆಯಿರಿ

ಬೆಂಗಳೂರ ಪ್ರೆಸ್
Sri Vidyabharathi Book Centre, Sringeri
ಬೆಲೆ: ರೂ 2-00